# श्री वैद्यनाथाष्टकम्

श्रीराम सौमित्रि जटायुवेद- षडाननादित्य कुजार्चिताय ।

श्री नीलकण्ठाय दयामयाय श्री वैद्यनाथाय नमः शिवाय ॥ १ ॥

गंगाप्रवाहेन्दु-जटाधराय त्रिलोचनाय स्मरकालहन्त्रे ।

समस्त देवैरपि पूजिताय श्री वैद्यनाथाय नमः शिवाय ॥ २ ॥

भक्तप्रियाय त्रिपुरान्तकाय पिनाकिने दुष्टहराय नित्यम् ।

प्रत्यक्षलीलाय मनुष्यलोके श्री वैद्यनाथाय नमः शिवाय ॥ ३ ॥

प्रभूतवातादि समस्त रोग-प्रणाशकर्त्रे मुनिवन्दिताय ।

प्रभाकरेन्द्वग्निविलोचनाय श्री वैद्यनाथाय नमः शिवाय ॥ ४ ॥

वाक्श्रोत्रनेत्राङ्घ्रिविहीनजन्तोः वाक्श्रोत्रनेत्राङ्घ्रिमुखप्रदाय ।

कुष्ठादिसर्वोन्नतरोगहन्त्रे श्री वैद्यनाथाय नमः शिवाय ॥ ५ ॥

वेदान्तवेद्याय जगन्मयाय योगीश्वरध्येयपदांबुजाय ।

त्रिमूर्तिरूपाय सहस्रनाम्ने श्री वैद्यनाथाय नमः शिवाय ॥ ६ ॥

स्वतीर्थ मृत् भस्मभृदंगभाजां पिशाचदुःखार्तिभयापहाय ।

आत्म स्वरूपाय शरीरभाजां श्री वैद्यनाथाय नमः शिवाय ॥ ७

श्री नीलकण्ठाय वृषध्वजाय स्रग्गन्धभस्माद्यपिशोभिताय ।

सुपुत्र दारादि सुभाग्यदाय श्री वैद्यनाथाय नमः शिवाय ॥ ८ ॥

वालाम्बिकेश वैद्येश भवरोगहरेति च।

जपेन्नामत्रयं नित्यं महारोगनिवारणम्॥९॥

|| इति श्री वैद्यनाथाष्टकम् ||

eAstroHelp